Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 5 | ISSN : 2582-0095

# कौटिल्यस्य अर्थशास्त्रे गुप्तचरविचार: वर्तमानसामयिकप्रासङ्गिकताश्च



अजय जायसवाल
वरिष्ठशोधछात्रः, दर्शनशास्त्र केन्द्रम्
सामाजिक शिक्षण संस्थानम् ,
जवाहरलाल नेहरू विश्वविद्यालयः,
नई दिल्ली, भारत।

**Article Info**
Volume 3 Issue 5
Page Number: 36-39
Publication Issue :
September-October-2020
**Article History**
Accepted : 20 Sep 2020
Published : 30 Sep 2020

**प्रस्तावना: –**अस्मिन् शोधपत्रे गुप्तचरस्य स्वरूपवर्णनम्, राज्यस्य कृते गुप्तचाराणां उपयोगिता, गुप्तचराणां नामोल्लेखपूर्वकं कस्य गुप्तचरस्य किं कार्यं अथ च गुप्तचरमाध्यमेन कथं शत्रुरूपरि विजयप्राप्ति: भवति। इत्यादिकं सर्वमपि प्रतिपाद्य वर्तमानसमयेऽपि तेषां राष्ट्रनिर्माणे कथं सहाय्यं एतत्सर्वमपि वर्णितं वर्तते।

**संकेतसूचकशब्दाः –** कौटिल्य, अर्थशास्त्र, गुप्तचर, तकनीकी, रक्षातन्त्र, राष्ट्रसुरक्षा

कौटिल्यस्य अर्थशास्त्रे पञ्चदशाधिकरणानि सन्ति । तत्र प्रथमाधिकरणस्य नाम 'विनयाधिकरणम्'अस्ति। विनयाधिकरणे एकादशाध्यायस्य सप्तप्रकरणादारभ्य गुप्तचरविषये विचारा: विद्यन्ते। कस्मिंश्चिदपि राज्ये गुप्तचरानाम् अत्यन्तमेव महत्वपूर्णस्थानं भवति। अतैव कौटिल्येन उक्तमस्ति यद् अमात्यस्य नियुक्ते अनन्तरमेव शीघ्रतया गुप्तचराणां नियुक्ति: भवेत चेत् राज्यस्य कृते वरं भवति। कौटिल्य-अर्थशास्त्रे निम्नलिखितरूपेण गुप्तचराणां विभागस्वरूपादिकं व्यवस्थापितं वर्तते –

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

कापटिक उदास्थित ग्रहपतिक वैदेहक तापस सत्री तीष्ण रसद परिव्राजका आदि भेदेन चलाचलगुप्तचराणां स्वरूपवर्णनं कौटिल्येण कृतम्। [१] प्रत्येकस्यापि गुप्तरचरस्य लक्षणं अथ च कार्यं किं किं विद्यते एतत् सर्वं वर्ण्यते यत् –

१- कापटिक सैव भवति यत् अन्यराज्यस्य ये मन्त्रिण: सन्ति अथ च विशिष्टजनानाम् रहस्यावगमनस्य प्रयासं करोति। अयं गुप्तचर: सर्वदेऐव छात्रवेशभूषायां तिष्ठति, येन अस्य वास्तविकस्वरूपज्ञानं कस्यापि न भवति। [२]

२- उदास्थित: सैव भवति य: प्रज्ञावान् भवति एवं सन्यासीवेशभूषायामवतिष्ठति । स: शिष्येभ्य: सह जीवनयापनञ्च करोति । [३]

३- गृहपातिक: गुप्तचरः सैव भवति यः कृषकवेशभूषायां कृषि इत्यदि कार्येषु सदैव संलग्नः दृश्यते । [४]

४- वैदेहक गुप्तचरः अर्थात यत् पवित्रः, हृदयभावनावान् अथ च प्रज्ञावान् भवति । किन्तु स समाजे निर्धरूपेण तिष्ठति। [५]

५-तापस गुप्तचरः सैव भवति य: मुण्डः अथ च अत्यन्त जटिलवेशभूषायां निवसति एव राजाज्ञां सर्वदैव पालयति । [६]

उपर्युक्त सर्वेपि गुपचराः स्वस्थाने स्थित्य स्वकार्यं कुर्वन्ति । अतैव एते स्थिता गुप्तचराः सञ्चिकाः भवन्ति । अन्येतु ये गुप्तचराः भवान्ति ते परिभ्रमणं कुर्वन्ति तेषां सञ्ज्ञा सञ्चारनामक: गुप्तचरः भवति ।

तेषां सञ्चारनामकानां गुप्तचरानां  वर्णनं कौटिल्येन निम्नलिखित रूपेण वर्णितम् -

१- प्रथमः सत्री नामकः गुप्तचरः भवति । सः अनेकेषु शास्त्रेषु निष्णातः भवति यथा सामुद्रिकलक्षणशास्त्रे शिक्षाशास्त्रे कामशास्त्रे च सः निपुणः भवति । एवं रूपेण सत्री गुप्तचरः भवति । [७]

२- द्वितीयः तीक्ष्णः नामक: गुप्तचर: भवति । सः शूर्वीर्पुरुषः देहात्ममोह परित्यक्तः च भवति । सः स्वकार्यसम्पादनाय हिन्सकप्राणिभिः सह् अपि युद्धं कर्तुं शक्नोति । [८]

३- त्रितीयः रसदः नामकः गुप्तचरः भवति । सः स्वकार्ये क्रूरः अपि भवति । सः उत्साहरहितो अपि भवति । अथ च सः देशरक्षणार्थं स्वस्यकुटुम्बेन साकम् अपि स्नेहरहितः भवति। स एव रसदः। [९]

४- परिव्राजका गुप्तचरा सा भवति या दरिद्रा विधवा प्रगभा च भवति । सा अन्तःपुरे सत्कारप्राप्ता ब्राह्मणी अपि भवति । सा आमात्यस्य गृहे सर्वदैव गमनम् अपि करोति । एषा एव परिव्राजिका । एतस्मात् इदं ज्ञातं भवति यत् भारतवर्षे स्त्रिणां अपि गुप्तचरव्यव्यस्थायां प्रवेश: आसीत् । [१०]

**निष्कर्षः**

यथा उपरि वर्णनम् अस्ति तथैव विधिवत गुप्तचरस्य स्वरूपसंख्यादे: वर्णनं कौटिल्यस्य अर्थशास्त्रे विद्यते। द्विविध रूपेण - स्थिता गुप्तचराः सञ्चार गुप्तचरः च भवति । तत्रापि कतिपय उपभेदाः सन्ति - यथा कापटिक उदास्थित गृहपातिक: वैदेहक सत्री तीक्षणः  रसदः च इत्यादि । उपर्युक्तविवेचनानुसारेण वयं कथयितुम् शक्नुमः यत् पुरातन् कालादेव भारतवर्षे गुपतचराणां सन्दर्भे अति सूक्ष्म व्यवस्था आसीत। एतद् राष्ट्रसुरक्षा दृष्टया अतीव महत्वपूर्णपदमासीत्। एतस्य फ़लस्वरूपेन एव भरतवर्षस्य यश: कीर्ति: सर्वदिशा उन्मुखा असीत् । कालान्तरे भारतवर्षे राजनीतिक भौगोलिकीयखन्डता  अभवत्, तस्य अनेकानि कारणानि अभवन् किन्तु तेषां गुप्तचर व्यवस्था शिथलीकरणमपि मुख्यं कारणं सम्भावितं वर्तते। सम्प्रति काले अपि वयं द्रष्टुं शक्नुमः यत् गुप्तचरव्यवस्था अतीवमहत्वपूर्णम् अस्ति। अन्तर्जाल तकनीकिकारणेन इदं तु अत्यन्तं सूक्ष्मम् अभवत् । सर्वे देशाः स्वस्य एवं परकीयस्य देशस्य जनानां अधिकाधिक सुचनाया: एकत्रीकरणं सर्वदा करोति, अस्या: प्रक्रियाया: इदानीं समये अतीववृद्धि: जाता। अतः गुप्तचर विषये यः सन्कल्पना कौटिल्येन कृता सा अतीवसूक्ष्मदर्श। अन्ततः आधुनिकसन्दर्भे यदि पश्यामः तर्हि तस्य दूर्दर्शिता अपि सिद्धं भवति।

**सन्दर्भ :**

१- कौटिल्य अर्थशास्त्र, १, ११, ७, २.

२- वही, १, ११, ७, ३.

३- वही, १, ११, ७, ६.

वही, १, ११, ७, ७.

४-वही, १, ११, ७, १२.

वही, १, ११, ७, १३.

५-वही, १, ११, ७, १४.

वही, १, ११, ७, १५.

६-वही, १, ११, ७, १६.

वही, १, ११, ७, १७.

वही, १, ११, ७, १८.

७- वही, १, १२, ८, १.

वही, १, १२, ८, २.

८- वही, १, १२, ८, ३.

९- वही, १, १२, ८, ४.

१०- वही, १, १२, ८, ५.

वही, १, १२, ८, ६.

## सन्दर्भ सूची

१- कौटिलीय अर्थ शास्त्र हिन्दी भाषानुवाद सहित, अनुवादक: पण्डित उदयवीर शास्त्री, संस्कृत पुस्तकालय, लाहौर, १९२५.

२- Kautilya's Arthashastra, Translated and Edited by R. Shamasastry, Sri Raghuveer Printing Press, 1951